# संस्कृत-वार्ता:

दिनाङ्क :- 09.11.2025 प्रात: - 06:55

## प्रधानमंत्री-नालसा

प्रधानमन्त्री नरेन्द्रमोदी ह्यः नवदिल्ल्यां सर्वोच्चन्यायालये विधि-सहायता-वितरण-तन्त्रस्य सुदृढीकरणविषये राष्ट्रिय-सम्मेलनम् उद्घाटितवान्। सः नालसा इत्यस्य समुदायिक-मध्यस्थता-प्रशिक्षण-माड्यूल् इत्यस्य अपि उद्घाटनं कृतवान्, तेनोक्तं यत् सामाजिक-न्यायः तदा एव सम्भवः यदा सर्वेभ्यः न्यायः प्राप्यते तथा च विधि-अभिलेखाः स्थानीयभाषासु उपलभ्यन्ते इति।

---

## बिहार - प्रचार:

बिहार-विधानसभा-निर्वाचनस्य द्वितीय-चरणस्य प्रचारः ह्यः प्रचारस्य अन्तिमदिने तीव्रम् आसीत्। अस्मिन् चरणे मङ्गलवासरे विंशति मण्डलेषु द्वाविंशत्यधिकैकशतासनेषु मतदानं भविष्यति। एन्. डी. ए., महाघटबन्धन्, अन्ये च दलानां वरिष्ठनेतारः ह्यः सम्पूर्णे राज्ये जनसभां सार्वजनिकसभां च आयोजयित्वा स्वप्रत्याशिनां कृते समर्थनं प्राप्तुं अन्तिमप्रयत्नं कृतवन्तः।

---

## उत्तराखण्ड् स्थापना दिवस

उत्तराखण्ड्-राज्यस्य स्थापनायाः रजतमहोत्सवस्य कार्यक्रमे भाग-ग्रहणाय प्रधानमन्त्री अद्य देहरादून-नगरं गमिष्यति। सः अवसरेस्मिन् स्मारक-प्रैष्य चिटिकायाः विमोचनं करिष्यति, सभां च सम्बोधयिष्यति। श्रीमोदी अष्टसहस्र-कोटि-रूप्यकाणां बहुविधविकासपरियोजनानां उद्घाटनम् अपि करिष्यति।

---

## राष्ट्रपतिः मुर्मूः - अंगोला-यात्रा

राष्ट्रपतिः द्रौपदी मुर्मूः अंगोला-बोत्सवाना-देशयोः राजकीययात्रायां वर्तते। सा गतरात्रौ अंगोला-देशं प्राप्तवती। एषा यात्रा एतौ आफ्रिकादेशौ प्रति कस्यापि भारतीयराष्ट्रप्रमुखस्य प्रथमा यात्रा अस्ति। नवम्बर-मासस्य त्रयोदशदिनाङ्कपर्यन्तं प्रवर्तमानायां अस्यां यात्रायां सा स्वीय यात्रायाः प्रथमे चरणे अङ्गोला-देशस्य राष्ट्रपतिना जोआओ लौरेन्को इत्यनेन सह द्वैपाक्षिकं वार्तालापं करिष्यति। सा अङ्गोला-देशस्य संसदं सम्बोधयिष्यति तथा च अङ्गोला-देशस्य स्वातन्त्र्यस्य पंचाशत्तमे वार्षिकोत्सवे भागं ग्रहीष्यति। अस्य मासस्य एकादश तः त्रयोदश दिनाङ्कपर्यन्तं यात्रायाः द्वितीये चरणे राष्ट्रपतिः बोत्सवाना-देशे भविष्यति।

---------------------------------------------------

## एन्.जी.टी.- सी.पी.सी.बी

राष्ट्रिय-हरित-न्यायाधिकरणेन (एन्. जी. टी.) इत्यनेन केन्द्रीय-प्रदूषण-नियन्त्रण-मण्डलम् (सी. पी. सी. बी.), इत्यमुं दिल्ली-उत्तरप्रदेश-हरियाणा-बिहार-राज्य-प्रदूषण-नियन्त्रकेभ्यः, गङ्गा-यमुना इत्यादिषु महत्त्वपूर्ण-जलाशयेषु अनुपचारित-अपशिष्टानां निर्गमनस्य आरोपिनां सप्तदश-शत-तोप्ताधिकानां स्थूल-प्रदूषण-उद्योगाणां (जी. पी. आई.) इत्येतेषां विरुद्धं शीघ्रं कार्याचरणाय निर्देशः प्रदत्तः।

---------------------------------------------------

## ट्रम्प जी-20

डोनाल्ड् ट्रम्प इत्येषः दक्षिण-आफ़्रिकादेशे श्वेतवर्णीयजनानां उत्पीडनं प्रचलति इत्यस्मिन् विषये अस्वीकृतप्रस्तावानां कारणात् अमेरिका-देशः जी-20 शिखरसम्मेलने भागं न भजिष्यति इति उक्तवान्। अमेरिकादेशस्य राष्ट्रपतिः अवदत् यत् एतत् सम्पूर्णं लज्जास्पदम् अस्ति यत् दक्षिण-आफ़्रिका अस्य सम्मेलनस्य आतिथ्यं करोति, यत्र विश्वस्य बृहत्तमानां अर्थव्यवस्थानां नेतारः अस्मिन् मासस्यान्ते जोहान्स्बर्गे समागमिष्यन्ति।

---------------------------------------------------

**पंकज स्नूकर**

पङ्कज् आडवानी इत्येषः ह्यः दोहा-नगरे कनाडादेशस्य साहिल् नाय्यर इत्यस्य विरुद्धं चत्वारि एकं इत्याङ्कैः विजयं प्राप्य स्वस्य आई बी एस एफ विश्व-स्नूकर्-चैम्पियन्शिप्-अभियानम् आरब्धवान्।

---------------------------------------------------

**संस्कृत - साप्ताहिकी**

प्रियाः श्रोतारः, संस्कृतजगता सम्बद्धैः विभिन्नैः क्रियाकलापैः संवलितस्य संस्कृत-साप्ताहिकीति-विशिष्ट-कार्यक्रमस्य प्रसारणम् आकाशवाण्याः एफ.एम.गोल्ड-प्रवाहिकातः अद्य मध्याह्ने सार्धैक-वादनतः भविष्यति, भवन्तः सर्वे श्रोतुं प्रभवन्ति।

।। इति वार्ता:।।